चर्य्या, स्त्री, (चर+“गदमदचरयमश्चानुपसर्गे ।” ३ । १ । १०० । इति यत् । स्त्रियां टाप् ।) ईर्य्यापथस्थितिः । इत्यमरः । २ । ७ । ३६ ॥ नियमापरित्यागः । ईर्य्यते गुरोः शास्त्रोपासनया ज्ञायते ईर्य्या सा च ध्यानधारणादिः तस्याः पन्था उपायः तत्र व्रतिनां या स्थितिरवस्थानमपरित्यागः सा । इति भरतः ॥ (यथा, महाभारते । १ । २ । ३२६ ।

“चर्य्यायां हयसुतुष्टं पाण्डवस्यानुगच्छतः ॥”)

गमनम् । अदनम् । आचरणम् । इति मुग्धबोधटीकायां दुर्गादासः ॥ (यथा, मनुः । ६।३२ ।

“आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनुम् ॥”

सेवा । यथा, रामायणे । २ । २८ । १५ ।

“वनवासस्य शूरस्य मम चर्य्या हि रोचते ॥”

त्रि, अनुष्ठेयः । आचरणीयः । यथा, मनुः ।३।१।

“षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ॥”)

चर्व्व, कि भक्षे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) कि, चर्व्वयति चर्व्वति तण्डुलं बालकः । इति दुर्गादासः ॥

चर्व्वणं, क्ली, (चर्व्व+भावे ल्युट् ।) दन्तैश्चूर्णनम् । इति हेमचन्द्रः । ३ । ८८ ॥ चिवान इति भाषा ॥ (यथा, हारिते प्रथमे स्थाने प्रथमेऽध्याये ।

“चर्व्वणं गिरणञ्चापि कासितं श्वासितं तथा ॥”)

चर्व्वा, [न्] पुं, तलप्रहारः । इति हारावली । १६७ ॥

चर्व्वितं, त्रि, (चर्व्व्यते स्म इति । चर्व्व+कर्म्मणि क्तः ।) कृतचर्व्वणम् । भक्षितम् । इत्यमरः । ३।२।११० ॥ (यथा, भागवते । ७ । ५ । ३० ।

“अदान्तगोभिर्विशतां तमिस्रं
पुनःपुनश्चर्व्वितचर्व्वणानाम् ॥”)

चर्व्वितपात्रकं, क्ली, (चर्व्वितानां ताम्बूलादीनां त्यागपात्रम् । ततः स्वार्थे कन् ।) चर्व्विततांम्बूलादित्यागपात्रम् । पीकदान इति भाषा ॥ यथा, रासलीलायां पातालखण्डे ।

“ताम्बूलं दर्पणं पानपात्रं चर्व्वितपात्रकम् ॥”

चर्व्व्य, त्रि, (चर्व्व्यते दन्तैश्चूर्ण्यते इति । चर्व्व+कर्म्मणि ण्यत् ।) चर्व्वणीयम् । यथा,—

“षट्कोटिं ब्राह्मणाञ्च भोजयामास नित्यशः ।
चूष्यपेयलेह्यचर्व्व्यैररतिलक्षिं दिने दिने ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

चर्षणिः, पुं, (कर्षतीति । कृष+“कृषेरादेश्च चः ।” पां-उणां । २ । १०३ । इति अनिः आदेश्च चः ।) जनः । यथा, श्रीभागवते ।

“स चर्षणीनामुदगाच्छुचो मृजन्
प्रियः प्रियाया इव दीर्घदर्शनः ॥”

मनुष्यजातिः । यथा,—

“अर्य्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः ।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥”

इति श्रीभागवते । ६ । ६ । ४१ ॥ “चर्षणयः कृताकृतज्ञानवन्तः । पश्चन्निकर्म्मत्वेन निघण्टावुक्तेः । यत्र येषु आत्मानुसन्धानविशिष्टा मानुषी जातिश्चोपकल्पिता । तथा च श्रुतिः । पुरुषत्वे चाविस्तरामात्मेति ।” इति तट्टीकायां श्रीधरस्वामी ॥ (अत्र उणादिवृत्तिकृतोज्ज्वलदत्तेन तु “कृषेरादेश्च धः ।” इति पठित्वा धर्षणिर्बन्धकीति व्याख्यातम् ॥)

चल, क भृतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, चालयति । दन्त्यवकारादिरयमिति दुर्गसिंहकुमारनन्दी । भृतिरिह पोषणम् । इति दुर्गादासः ॥

चल, ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ज, चालः चलः । मित्त्वे इति वक्ष्यमाणं न पठित्वा इममेव मानुबन्धं भ्रान्ताः पठन्ति तद्धेयम् । तेनास्य चालयति हस्तिनं यन्ता । चलमानोऽनिल इत्यत्र ताच्छील्ये शानः । मित्त्वे । पूर्व्वेणान्वयः । चलधातुः कम्पने मानुबन्धः स्यादित्यर्थः । म, चलयति लतां वायुः । चलयन् भृङ्गरुचस्तवालकानिति रघुः । चालयन् सकलां पृथ्वीमिति घणन्तात् चालं करोतीति णौ शत्रन्तम् । इति दुर्गादासः ॥

चल, श विलासे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) श, चलती चलन्ती । विलासः क्रीड़नम् । इति दुर्गादासः ॥

चलं, त्रि, (चलति गच्छतीति । चल+पचाद्यच् ।) चञ्चलम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा, रघुः । ११ । १५ ।

“ताड़का चलकपालकुण्डला
कालिकेव निविड़ा बलाकिनी ॥”

पारदः । इति हेमचन्द्रः । ४ । ११६ ॥ अष्टादशाक्षरवृत्तभेदः । यथा, वृत्तरत्नाकरे ।

“भौ नजौ भौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः ॥”)

चलः, पुं, (चल+पचाद्यच् ।) कम्पः । तद्युक्ते त्रि । इति मेदिनी । ले, १५ ॥ (शिवः । यथा, महाभारते । १३ । १७ । ११६ ।

“महाकेतुर्महाधातुर्नैकसानुश्चरश्चलः ॥”

विष्णुः । यथा, तत्रैव । १३ । १४९ । ९२ ।

“वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥”

“वायुरूपेण चलः ।” इति भाष्यम् ॥)

चलचञ्चुः, पुं, (चला चञ्चला चञ्चुरस्य ।) चकोरपक्षी । इति हेमचन्द्रः । ४ । ४०५ ॥

चलत्पूर्णिमा, स्त्री, (चलन्ती पूर्णिमा तदाश्रयीभूतचन्द्र इवेति तात्पर्य्यार्थः ।) चन्द्रकमत्स्यः । इति त्रिकाण्डशेषः ॥

चलदङ्गः, पुं, (चलत् चञ्चलं अङ्गं यस्य ।) मत्स्यविशेषः । चेङ्गा इति भाषा ॥ अस्य गुणाः । अनभिष्यन्दित्वम् । वाते हितत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

चलदङ्गकः, पुं, (चलदङ्गं यस्य इति कप् ।) चलदङ्गमत्स्यः । इति जटाधरः ॥

चलदलः, पुं, (चलानि दलानि पत्राणि यस्य ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अश्वत्थशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

चलनं, क्ली, (चल+भावे ल्युट् ।) भ्रमणम् । (यथा, देवीभागवते १ । १७ । १६ ।

“चलनञ्च विना कार्य्यं न भवेदिति मे मतिः ॥”)

कम्पनम् । (यथा, पञ्चतन्त्रे । २ । १७४ ।

“द्वावुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने ।
हस्तयोश्चलनादेको द्वितीयः पादवेगजः ॥”)

कम्प्रे, त्रि । इति मेदिनी । ने, ६१ ॥

चलनः, पुं, (चलत्यनेन इति । चल+करणे ल्युट् ।) पादः । इति हेमचन्द्रः ॥ हरिणः । इति जटाधरः ॥

चलनकः, पुं. (चलन+संज्ञायां कन् ।) चलनातकम् । इति हेमचन्द्रः । ३ । ३३८ ॥

चलनी, स्त्री, (चलन+ङीप् ।) वारीभेदः । जगबन्धनी । वस्त्रघर्घरी । इति हेमचन्द्रः ॥ घाघरा इति भाषा ॥

चलपत्रः, पुं, (चलानि पत्राणि यस्य ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ (यथा, नैषधे ।

“अङ्गेन केनापि विजेतुमस्या
गवेष्यते किं चलपत्रपत्रम् ।
नचेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ॥”)

चला, स्त्री, (चलतीति चल+पचाद्यच् टाप च । नैकत्रावस्थितत्वात् तथात्वम् ।) लक्ष्मीः । इति मेदिनी । ले, १५ ॥ सिह्लकः । इति रत्नमाला ॥

चलाचलः, त्रि, (चलतीति चल+अच् । चरिचलिपतिवदीनां वा द्वित्वमितिद्वित्वे अभ्यासस्य आगागमश्च इति वार्त्तिकसूत्रेणास्य सिद्धिः ।) चञ्चलः । इत्यमरः । ३ । १ । ७४ ॥ (यथा, किरातार्ज्जुनीये ।११।३० ।

“जहिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम् ॥”)

काके पुं, । इति राजनिर्घण्टः ॥

चलातङ्कः, पुं, (चले चलने आतङ्को भयं यस्मात् ।) वातरोगः । इति राजनिर्घण्टः ॥

चलितं, त्रि, (चल+कर्त्तरि क्तः ।) कम्पितम् । इत्यमरः । ३ । १ । ८७ ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३६५ ।

“तयोर्विलासवलितैश्चलितापाङ्गविभ्रमैः ॥”)

गतम् । चल ज गतावितिदर्शनात् ॥ (यथा, गोः रामायणे । ३ । ५७ । २३ ।

“अधिरूढे गजारोहे यथास्याच्चलितो गजः ॥”)

चलुः, पुं, (चल+उन् ।) गण्डूषः । इति हेमचन्द्रः । ३ । २६२ ॥

चलुकः, पुं, (चलुना कायतीति । कै+कः ।) प्रसृतिः । भाण्डभेदः । इति मेदिनी । के, ८६ ॥

चविः, स्त्री, (चर्व्व्यते इति । चर्व्व+इन् । पृषोदरादित्वात् रलोपे साधुः ।) चविका । इति शब्दरत्नावली ॥

चविकं, क्ली, (चवि+संज्ञायां कन् ।) चविका । इति भरतधृतरुद्रः ॥

चविका, स्त्री, (चवि+स्वार्थे कन् ।) वृक्षविशेषः । चइ इति भाषा ॥ तत्पर्य्यायः । चव्यम् २ । इत्यमरः । २ । ४ । ९४ ॥ चव्या ३ चविकम् ४